# श्रीगुरु-स्तवः

## [१ रुद्रयामल-तन्त्रोक्त श्रीगुरु-स्तोत्र]

शिरः-स्थित-सु-पङ्कजे[1] , तरुण - कोटि-चन्द्र-प्रभम् ।
वराभय,- कराम्बुजं सकल - देवता - रूपिणम् ।।
भजामि वरदं गुरुं, किरण-चारु-शोभोज्ज्वलम्[2] ।
प्रकाशित - पद - द्वयाम्बुजमलक्त[3] - कोटि-प्रभम् ।।१

जगद् - भय - निवारणं, भुवन - भोग-मोक्ष-प्रदम् ।
गुरोः पाद-युगाम्बुजं, भजति[4] यत्न योगे जयम् ।।
भजामि परमं गुरुं, नयन - पद्म - मध्य - स्थितम् ।
भवाब्धि-भय-नाशनं, शमन-रोग - काल[5] - क्षयम् ।।२

प्रकाशित सु - पङ्कजे, सुदल[6] - षोडशाख्ये प्रभुम् ।
परापर-गुरुं भजे, सकल - राज्य[7] - भोग - प्रदम् ।।
विशाल-नयन-द्वयाम्बुज[8] - तडित्-प्रभा - मण्डलम् ।
कडार-मणि-पाटल - द्युतिमदिन्दु - विन्द्विन्दुकम्[9] ।।३

महौजसमुमापतेर्विगत - दक्ष - भागे हृदि ।
प्रभाकर - शतोज्ज्वलम्, सुविमलेन्दु-कोटयाननम् ।।
भजामि परमेष्ठिनं, गुरु-गभीर-रावोल्वनम्[10] ।
चलाचल - कलेवरं, प्रचपले दले द्वादशे ।।४

गुर्वङ्घ्रयब्जं[11] शुभं मादन-गण-दहनं[12] हेम-मञ्जीर[13]-सारम् ।
नाना-शब्दाद्भुताह्लादित-परिचरणा[14] चारु-चक्रं त्रिभङ्गम् ।।
नित्यं ध्यायेत् प्रभाते अरुण-शत-घटा-शोभनं योग-गम्यम् ।
नाभौ पद्मेऽति-कान्ते दश-दल-मणिभे भाव्यते योगिभिर्यत् ।।५

या माता मय-दानवादि-सुभुजा[15]-निर्माण[16]-सीमा-पुरे ।
स्वाधिष्ठान-निकेतने रस-दले वैकुण्ठ - मूले मया ।।
जन्मोद्धार-विकार-भाव-लहरी[17] वेद-प्रभा भाव्यते ।
कन्दर्पार्पित-शान्ति-योनि-जननी विष्णु-प्रिया शाङ्करी ।।६

या भासानल[१८]-कुण्डली कुल-पथोद्दामाभ[१९]-शोभाकरी ।
मूले पद्म-चतुर्दले कुल-वती निःश्वास-देशाश्रिता ।।
साक्षात्-कांक्षित-कल्प-वृक्ष-लतिका सुप्ता स्वयम्भू[२०]-प्रिया ।
नित्या योगि-भयापहा विष-हरा गुर्वम्बिका भाव्यते ।।७
उर्ध्वाम्भोरुह-निःसृतामृत-घटा[२१] मोदाज्जलाप्लाविता[२२] ।
गुर्वाद्या[२३] परिपातु सूक्ष्म-पथगा तेजोमयी भास्वती ।।
सूक्ष्मा साधन-गोचरामृत-मयी मूलादि-शीर्षाम्बुजे ।
पूज्या[२४] चेतसि भाव्यते भुवि कदा माता सदोर्ध्वोद्गमा ।।८
स्थिति - पालन - योगेन ध्यानेन पूजनेन वा ।
यः पठेत् प्रत्यहं व्याप्य स देवो न तु मानुषः ।।
कल्याणं धनदं चैव[२५] कीर्त्तिमायुर्यशः - श्रियम् ।
सायाह्ने च प्रभाते च पठेद्यदि सु-बुद्धिमान् ।।
स भवेत् साधक - श्रेष्ठः कल्पद्रुम - कलेवरः ।
स्तवस्यास्य प्रभावेन[२६] वागीशत्वमवाप्नुयात् ।।९

पाठान्तर—१ शिरसि सित-पङ्कजे । २ शोभाकुलम् । ३ मलत्क । ४ जयति । ५ काम । ६ मृदुल । ७ बाह्य । ८ नयनाम्बुज-द्वय । ९ मुद्रित रुद्रयामल में अशुद्ध छपा है—'कडार-मणि-पाटलेन्दु-बिन्दु-बिन्दुकम्' (तीन अक्षर कम हैं) । १० गुरुमतीव-वारोज्ज्वलम् । ११ गुर्वाद्यं च । १२ मदन-निदहनम् । १३ मञ्जरी । १४ परिजनात् । १५ स्व-भुजा । १६ निर्वाण । १७ सुप्रहरिणो । १८ भाषा-नन । १९ कुल-पथाच्छामाभ । २० सूद्भाषन्ती । २१ घटी । २२ मोदोद्वलाप्लाविता । २३ गुर्वास्या । २४ पूर्णा । २५ धन-धान्यं च । २६ प्रसादेन ।

## [ २ कुब्जिका-तन्त्रोक्त श्रीगुरु-स्तोत्रम् ]

ॐ नमस्तुभ्यं महा-मन्त्र-दायिने शिव-रूपिणे । ब्रह्म-ज्ञान-प्रकाशाय, संसार-दुःख-तारिणे ।।१
अति-सौम्याय दिव्याय, वीराय ज्ञान-हारिणे । नमस्ते कुल-नाथाय, कुल-कौलिन्य-दायिने ।।२
शिव-तत्त्व-प्रबोधाय, ब्रह्म-तत्त्व-प्रकाशिने । नमस्ते गुरवे तुभ्यं, साधकाभय-दायिने ।।३
अनाचाराचार-भाव-बोधाय भक्त-हेतवे । भावाभाव-विनिर्मुक्ताय, मुक्ति-दात्रे नमो नमः ।।४
नमस्ते शम्भवे तुभ्यं, दिव्य-भाव-प्रकाशिने । ज्ञानानन्द-स्वरूपाय, विभवाय नमो नमः ।।५
शिवाय शक्ति-नाथाय, सच्चिदानन्द-रूपिणे । काम-रूपाय कामाय, काल-केलि-कलात्मने ।।६
कुल-पूजोपदेशाय, कुलाचार-स्वरूपिणे । आरक्त-लसच्छक्तये, सम-भाग-विभूतये ।।
नमस्तेऽस्तु महेशाय, नमस्तोऽस्तु नमो नमः ।।७
इदं स्तोत्रं पठेन्नित्यं, साधको गुरु-दिङ्-मुखः । प्रातरुत्थाय देवेशि ! ततो विद्या प्रसीदति ।।१